8 D1 om. 8 (cf v. l. 4). — a) V1 B2 D मारुतोद्धूत°. Ś1 Ñ V1 B D2 T3 शिखरा (T3 °रैः) D2–5.7 शिरसः (for शिखरैः). — b) Ś1 D4 पर्वतः Ñ2 D3.5 Ck प्रनृत्ता V1 B1.2 D1.5 T3 M3.4 प्रनृत्ता B4 प्रनृत्यन्ता G (ed.) प्रनृत्ता Cv m g t as in text. Cr प्रमत्त (for प्रनृत्त). V1 हार (for इव). Ś1 Ñ1 V1 D4.6 T3 M3.4 (after corr. sec. m.) पवता; Ñ1 B D5–7 पर्वते Dg1 G2 सर्वतः M3 पादप (for पर्वतः). — c) Dt1 Dd1 Dm1 T1 पुष्पपत्राणि T3 पत्रपुष्पाणि सर्वतः. — For 8cd Ś1 Ñ V1 B D4.7 subst. M4 ins. after 6ab:

2086* पादपाः पुष्पवर्षेण किरन्त्येते च मेदिनीम् ।

[D1.6.7 पुष्पकिरै. M4 °पुष्प° (for °वर्षेण). V1 हे नदी (sic) (for मेदिनीम्). V1 किरन्त्येव मेदिनी. D5–6.7 किरति सरित शुभो (for the post. half).]

9 D1.6.7 om. 9. Ś1 Ñ V1 B D2.6 M4 (M4 reading before 6ab) transp. 9 and 10. D1 reads 9 after 1. — a) Ś1 D6 निभासेना (D6 °ना) D1 निकाशोप T3 M3 निकाशोभा (M3 °भो). Cg t निकाशोदां (as in text). — b) D1 पुलिने (for पुलिन°). B1 मालिनीं (for °शालिनीम्). — c) Ś1 Ñ V1 B D1.3.6 जना (Ś1 D6 जन Ñ1 नव Ñ2 D5–7 जाल) पदाकीर्णां M4 हंससमाकीर्णां.

10 Ś1 Ñ V1 B D2.6 M4 (M4 reading before 6ab) transp. 9 and 10. — D1 om. 10. — a) Ś1 Ñ V1 B D4.7 वायुधूतान्. G1 उद्धू° M3 सधू° Cg as in text (for निर्धू°). B1 (before corr.) वायुना M3 वायुनो Cg as in text (for °ना). — b) Ś1 Ñ2 V1 D6 समताद्. Ñ1 B M4 संत (Ñ1 B3 °च) तान्. D5–6.7 सजन M3 विततान् Cg as in text (for विततान्). M3 -सायकान् Cg as in text (for संचयान्). — c) Ś1 D6 दोधूयमानान् V1 प्रोत्प्लुह्यमानान् B1.4 D5.7 G1 पोप्लु (D5 °धू; D7 °सू; G1 °प्ला) यमानान्. B3 (m. also as in B1) प्रोप्लूय°. Cr m g k t पोप्लूय° (as in text). Dg1 M3 विहगान् Cg as in text (for अपरान्). — d) V1 D3 पश्यैतान्. B4 पश्य त्वं G2 M1 संभ्रमन्. Cv g as in text. Cr पश्य तान् (for पश्य त्वं). V1 Dt1 D5 G M1 Cv तत्र (G1 Cv °त्र G2 M1 स्व) मध्यगे B1 वरशोचन (for °जलमध्यगान्). Ś1 D2.4.7 प्रसु (D2.7 °सू) सानि (D2 °त्ता इ) व पश्यत (Ś1 °तान्). Ñ D1–4 अंसमध्य (Ñ1 मध्य क) मलशोचन B3 (m. also) अमद्ध्य मल्लशोचने (sic). B4 पश्यास्य वरलोचन M3 पश्याम्भसि सुमध्यमे M4 मम सुनितमध्यमा Cv,t,p पश्येहाचरमध्यमे.

11 a) Ś1 Ñ V1 B D2.3.4 M4 एत हि Dg1 D4.5.7 T3 M3 तांश्चापि (Dg1 M3 °श्चां) Dt1 Dd1 Dm1 पश्यैतान् (Dt1 °तद्) G M1 पश्याशी M3 वानर Cg as in text

2 104 12
2 95 12
2 103 12

दर्शनं चित्रकूटस्य मन्दाकिन्याश्च शोभने ।
अधिकं पुरवासाच्च मन्ये च तव दर्शनात् ॥ १२
विधूतकलुषैः सिद्धैस्तपोदमशमान्वितैः ।
नित्यविक्षोभितजलां विगाहस्व मया सह ॥ १३
सखीवच्च विगाहस्व सीते मन्दाकिनीमिमाम् ।
कमलान्यवमज्जन्ती पुष्कराणि च भामिनि ॥ १४

त्वं पौरजनवद्व्यालानयोध्यामिव पर्वतम् ।
मन्यस्व वनिते नित्यं सरयूवदिमां नदीम् ॥ १५
लक्ष्मणश्चैव धर्मात्मा मन्निदेशे व्यवस्थितः ।
त्वं चानुकूला वैदेहि प्रीतिं जनयथो मम ॥ १६
उपस्पृशंस्त्रिषवणं मधुमूलफलाशनः ।
नायोध्यायै न राज्याय स्पृहयेऽद्य त्वया सह ॥ १७

(for रांक्षांति) —ᵇ) Ś1 D4 स्वकानाह्वयते B1.4 स्थां गास्वयना(B4 °ह्वयन) D2 °ह्वयतो D3 °ह्वयतनात् (sic) D1.5.7 वाग्याह्वायतो(D5 °ह्वयते) T2 °ह्वायको Cr g t as in text (for रयाह्वयनाः) —ᶜ) Ś1 Ñ2 V1 B D1.3.6 M4 अप्या(Ś1 D6 °व B4 D1.3 °स्या)रोहंति, D2 अधिरोहतु —ᵈ) Ś1 Ñ2 V1 B D2.6 Cg निकूजत (Ñ2 B2 °ति) Dg1 T1.2 G3 निकूजत (T2 °ति) D1 निगदत D2.5.7 कूजति च(D5 °तीव) M2.4 कूजतश्च(M4 °त सु) (for निष्कूजन्त) B1 शुभानि च G3 शुभां गिर, Cg as in text (for शुभा गिर)

12 ᵃ) Ś1 Ñ2 V1 B D1.3.6 दर्शनाद् (for °न) —ᵇ) D7 मदाकिन्या: Ś1 Ñ V1 B D1-7 सर्वदा (for शोभने) —ᶜ) Ś1 Ñ V1 B D2.7 पुर(V1 कुरु)वासेन D1 सुरवासात्तु (for पुरवासाच्च) —ᵈ) N2 B2 [ऽ]हं तव B2.4 Dg1 Dt1 Dd1 Dm1 D6 T3 G1.3 M1-3 Ct तव च (by transp) Cg as in text (for च तव) Ñ2 मन्ये तस्य तु सर्वश , V1 D1.3 मन्ये वास त्वया सह

13 V1 om (hapl) 13 D2.5.7 read 13 after 16 —ᵃ) Dg1 निर्धूत (for विधूत) Ś1 Ñ1 B2.4 Dg1 Dt1 Dd1 Dm1 D1.2.4 T2.3 G1 M3.4 °कल्मषै Cg as in text (for °कलुषै) D6 सत्त्वै (for सिद्धैस्) Ñ2 B3 जटाजिनधरैर्भीस्, B1 कुशाजिनधरैर् मुनिभिस् —ᵇ) Ś1 Ñ2 B3 D4 तपोवन (Ñ2 B3 °वह), M4 कृपा° (for तपोदम) Ś1 Ñ B Dt1 D1.7 M1-3(Dt1 श)मन्वितै G2 शतान्वितै Cg as in text (for शमा°) —ᶜ) B1 Dm1 D1-6 G1.3 M4 नित्य, Cg as in text (for °त्य) D2.5 स(D2 वृ [sic])क्षोभितजला —ᵈ) D6 विगाहसि (for °स्व)

14 ᵃ) Ś1 V1 B2.4 Dg1 D6 Ch सखि(Ś1 D4 यथा V1 Ch सुखी)वत्त Cr g t as in text (for सखी°) D1 सखीवत्त्ववगाहस्व D3 विहरस्व सखीवच्च D1.7 विगाहस्व सखीवच्च (by transp) D4 विगाहस्व सुखीवर्द —ᵇ) D2.5.7 नदीं (for सीते) Ś1 Ñ V1 B Dg1 Dt1 D1.6 G1.3 M4 नदीं (for इमाम्) D3 मदाकिनी नदीं —ᶜ) Dg1 T2 Cr [अ]वमज्जति G2 [उ]प म° M1(marg also) [अ]ति° Cm g k t as in text (for [अ]वमज्जन्ती) —ᵈ) T1 पुष्कराणीव G3 M1 पुष्कराण्यपि Cg पुष्कराणि च (as in text) G M2 भामिनी —For 14ᶜᵈ, Ś1 Ñ V1 B D1.3.6 M4 subst

2087* प्रसन्नाम्बुवहां नित्य तरङ्गाङ्कदभूषणाम् ।

[Ś1 D6 प्रसन्नां सुवहां Ñ B4 D3 °वहा B2.3 °वहां (for प्रसन्नाम्बुवहां) B3 M4 नित्यां (for नित्य) Ś1 D4 तरङ्गां इदभूषणां, Ñ1 B4 °दभूषितां, Ñ2 B3 °विभूषणां, B2 सरोरुह° (for the post half)]

while D2.5.7 subst

2088* पद्मकेसरयुक्तेन जलेन क्रीडता सह ।

[D2 त्रिदशेन (for युक्तेन) D2.5 जलेनाक्रीडती (for °न क्रीडता)]

15 ᵃ) Ś1 D6 जनैरिव नरौ पूर्णाम् , Ñ B2.4 D1.3 M4 नौरिव नरौ पू(D1.3 M4 फी)र्णाम् V1 नौरत्नवतं फीर्णाम् , B2 नगैरिव नरैः पूर्णाम् , D2.5.7 पश्यिण पौरजनवद्(D7 °जानेन) —ᵇ) Ś1 Ñ2 V1 B D6 M4 सर्वत (B2.4 °शा) Ñ1 पर्वत Dd1 पर्वते D1 पश्य च (for पर्वतम्) —ᶜ) V1 D1.3 इयिते (for वनिते) Ś1 D6 पश्यस्युत्फेनिला(D6 °ता) नित्यं, —ᵈ) Ś1 Ñ2 V1 B D1.3.6 M4 सरयूप्रतिमां D2.5.7 सरयू रामिमो

16 ᵃ) Ś1 N1 V1 B D1-7 M4 (अ)पि (for (च)व) T1 लक्ष्मणो धर्मसिद्धैव —ᵇ) B2.4 मन्नियोगे Dm1 मन्निदेशे, D4 परि° D7 परि° (for मन्निदेश) V1 ह्यस्मि देशे व्यवस्थिता, D2.5 सनि(D5 मन्नि)देशमवस्थित —ᶜ) M4(suf lin sec m as in text) स (for त्वं) D6 [अ]नुरक्तो (for [अ]नुकूला) —ᵈ) V1 D1.3 G3 M4 वर्ध(G3 जन)यसे, T2.3 M2.3 जायतो B(ed) °थो (for जनयथो) G2 M1 यथा (for मम) Ś1 Ñ B2.4 D2.4.7 प्रीतिं वर्ध(Ñ2 B3 जन)यसीव मे B1 प्रीतिं सजनयस्व —After 16 Ś1 Ñ V1 B D1.3.6 M4 ins

2089* नलिनान्युपभुञ्जाना सलिलानि च भाविनि ।
पाणिभ्यां पद्मताम्राभ्यां विगाहस्व सरिद्वराम् ।

[(1 1) Ś1 D6 फलमूलानि भुञ्जाना Ñ1 नलिन्यामुप° V1 D1.3 न(V1 म)लिनानि विचिन्वती(V1 D3 °ति) B4 नलिन्यामुप°, M4 नलिनानथ मजती (for the prior half) V1 D1.3 M4 कमलानि (for नलि°) Ś1 D1.3.6 M4 भामिनि (for भाविनि) —(1 2) Ś1 V1 D6 पद्माभ्यां B3 ताम्राभ्यां (for ताम्राभ्यां)]

while D2.5.7 read 13 after 16

17 D2.4.5.7 om (hapl) 17 —ᵃ) Ñ B3 उपस्पृश्य D1 अप स्पृशन् (for उपस्पृशन्) Ñ2 B3 पुण्यजले D2

इमा हि रम्या गजयूथलोलितां
निपीततोया गजसिंहवानरैः ।
सुपुष्पितैः पुष्पधरैरलंकृतां
न सोऽस्ति यः स्यान्न गतक्लमः सुखी ॥ १८ ॥

इतीव रामो बहु संगतं वचः
प्रियासहायः सरितं प्रति ब्रुवन् ।
चचार रम्यं नयनाञ्जनप्रभं
स चित्रकूटं रघुवंशवर्धनः ॥ १९ ॥

G 2. 104. 22
B 2. 93. 19
L 2. 108. 20

इति श्रीरामायणे अयोध्याकाण्डे एकोननवतितमः सर्गः ॥ ८९ ॥

त्रिपथगा (for त्रिपथगा) V1 उपस्पृशासवारण (sic) —ᵇ) Ś1 B1.3.4 D6 M4 मासम N2 D3 D1 पा V1 D3 कर G(ed) वने (for मधु) Ś1 T3 फलानना Dm1 °लिन Cv as in text (for °शन) —ᶜ) V1 D3 [अ]योध्यायां B3 D1 °ध्या गे (D1 वा) (for [अ]योध्यायां) V1 D1.3 राज्यस्य (for राज्याय) —ᵈ) Ś1 N2 V1 B D1.3.6 M4 स्पृहयामि N1 Dt1 T3 स्पृहये च Dg1 स्पृहयेय (for स्पृहयेऽथ) —After 17 V1 B2.4 D1.3 ins

2090* कस्य चास्मिन्प्रतिने स्याद्गिरौ रम्येऽसितेक्षणे ।
मुनिकिंनरगन्धर्वविद्याधरनिषेविते ।
इमां च सरितं पुण्यां पश्यन्को न रमे प्रिये ।
येयं मालेव शैलस्य विभात्यमलपङ्कजा ।

[(l. 1) B4 कस्मिन्नस्मिन् D3 वस्य चास्मिन् (for कस्य चास्मिन्) D3 गिरि (for गिरौ) V1 रम्येऽसितेने (sic) (for रम्येऽसिते) —B4 om. l. 2. —(l. 2) V1 निषेविता (for °ते) —B1 om. (hapl.) l. 3. 4. —(l. 3) D1 न (for च) D3 रम्यां (for पुण्यां) V1 काननविप्रिये D1 को रमते प्रिये (for को न रमे प्रिये) B4 पश्य स्व कानन प्रिये (for the post. half) —(l. 4) D1 जय (for येय)]

18 ᵃ) Ś1 N V1 B D1.3 पश्यन् (for रम्या) Ś1 V B Dg1 Dt1 D1 मृग (for गज) M4 सिंह (for -यूथ) Ś1 D1.6 -लोहितां N1 -लोलितां V1 M1 -शालिता B2-3 D2-4 -लोहि(B2 °भि)ता B4 -सेविता Dg1 Dt1 D1 शालिनीं Cg(?) as in text (for -लोलिता) —ᵇ) D1.2 निपीत V1 गजयूथ D1.3 M4 मृगपक्षि (for गजसिंह) —ᶜ) B3 स्वपुष्पितैस्, B4 Dt1 Dd1 Ct सुपुष्पिता M4 उपेयिवान् (for सुपुष्पितैः) Ś1 N B D1.2 तीरद्रुमैर् Dt1 Dd1 Dm1 T1 M1 Cm पुष्पभरै(M4 °फलै)र् G1 वृक्षचयैर् Cr g as in text Ck °धरैर् (for पुष्पधरैर्) —ᵈ) B3 शास्ति (for सोऽस्ति) Ś1 V1 B D1.2.3 यो(D2 [also] शि)स्यां N2 M3 यस्यां D4 सोस्यां (for य स्यान्) B3(also) विगतक्लमो D3 विगत क्ल° Cv as in text Cm g k अगतक्लम (for न गतक्लम) Ś1 Ñ V2 B D1.2.3 भवेत् T1 सुख M3 पुमान् Cv m g k t as in text (for सुखी)

19 V1 om. 19. —ᵃ) Ś1 D6 इत्येव D3 om. (for इतीव) B4 चितत शुभ D1-3 बहु सद्गु(D3 °भ)त G2 बहु सागत Cg k as in text (for बहु सगत) —ᵇ) Ś1 N B D1.2 M4 प्रियाद्वितीय Dm1 प्रिय सहाय (for प्रियासहाय) D सरितं (for °तं) —ᶜ) G2.3 M1 रम्यां (for रम्यं) M4 नवकाञ्चनप्रभं —ᵈ) G2 M1(v.l. o) विचित्रकूटं (for स चित्रकूटं)

Colophon —*Sarga name*: Ś1 Ñ2 V1 B D1.2.4.6 मंदाकिनीवर्ण(B4 °र्ण)न(N2 B1.3 °ना V1 D1.4 °नं) N1 चित्रकूटवर्णन D2.6 भरतपर्वणि चित्रकूट(D6 मंदाकिनी)दर्शन D7 मंदाकिनीदर्शनं —*Sarga no.* (figures, words or both) Ś1 V1 B1 D2.4 om. N2 D3 104 V1 D4 100 B2 97 B3 D7 M4 102 B4 98 Dg1 Dt1 Dd1 Dm1 T C M1.3 95 D1 156 D2 103 —After colophon G concludes with श्रीरामाय नमः —After Sarga 89 Ś1 Ñ V1 B Dt1 D1-7 M4 ins. a passage relegated to App. I (No. 26)

९०

G 2 106 1
B 2 96 3
L 2 110 1

तथा तत्रासतस्तस्य भरतस्योपयायिनः ।
सैन्यरेणुश्च शब्दश्च प्रादुरास्तां नभःस्पृशौ ॥ १

एतस्मिन्नन्तरे त्रस्ताः शब्देन महता ततः ।
अर्दिता यूथपा मत्ताः सयूथा दुद्रुवुर्दिशः ॥ २

स तं सैन्यसमुद्भूतं शब्दं शुश्राव राघवः ।
तांश्च विप्रद्रुतान्सर्वान्यूथपानन्ववैक्षत ॥ ३

तांश्च विद्रवतो दृष्ट्वा तं च श्रुत्वा स निःस्वनम् ।
उवाच रामः सौमित्रिं लक्ष्मणं दीप्ततेजसम् ॥ ४

90

Dm1 begins with ॐ M1 with श्रीरामचंद्राय नम M3 with श्रीरामाय नम —Before 1 Dg1 Dt1 Dd1 Dm1 T G M1-3 ins

2091* ता तथा दर्शयित्वा तु मैथिलीं गिरिनिम्नगाम् ।
निषसाद गिरिप्रस्थे सीतां मांसेन छन्दयन् ।
इदं मेध्यमिदं स्वादु निष्टप्तमिदमग्निना ।
एवमास्ते स धर्मात्मा सीतया सह राघव ।

[(l 1) Dt1 तत्र (for तथा) —(l 2) G3 चिन्तयन् (for छन्दयन्)]

1 a) Dg1 तदा Cv r m g k तथा (as in text) T3 स त्रासतस् (for तत्रासतस्) —b) T1 2 [श]नुयायिन, Cm k t [उ]पयायिन (as in text) —c) G3 सर्वेश, Cm g k t as in text (for शब्दश्) —For 1 Ś1 Ñ V1 B D1-7 M4 subst

2092* अथ रामे तथासीने भरते चाभिगच्छति ।
तस्य सैन्यस्य महतः प्रादुरासीन्महास्वन ।

[M4 om l 1 —(l 1) Ś1 D2 4-7 तत्र Ñ2 B3 समासीने, D1 3 5 तथासीते (for तथा°) V1 अथ रामस्तथा सीता (for the prior half) Ś1 D4 6 7 लक्ष्मणे Ñ1 B4 भरतस् (for भरते) D4 7 चाभिवीक्ष्य (D4 °क्ष)ति D5 चाभिगच्छति D6 चाभि गच्छति —(l 2) Ñ1 B4 तथा (for तस्य) D2 4 6 7 रौद्र आ(D2 °रूपा)सीत् (for प्रादुरासीन्)]

2 For subst in Ś1 Ñ V1 B D1-7 M4 cf v l 4 —a) M3 त्रस्तौ (sic) (for त्रस्ता) —d) Dt1 स्वयूथात्, G3 lacuna (for सयूथा) Dd1 Dm1 विद्रुता (for दुद्रुवुर्) M1 सम्प्रदुद्रुवु (for दुद्रुवुर्दिश)

3 For subst in Ś1 Ñ V1 B D1-7 M4 cf v l 4 —a) T2 तु (for तं)

4 a) Dg1 Dt1 Dd1 T3 G3 विप्रद्रुतान्, Dm1 विप्रद्रुतो, G3 M1 प्रद्रवतो (for विद्रवतो) —b) Dg1 च (for स) Dt1 Dd1 Dm1 महास्वनं, T1 3 G3 M2 3 च निस्वनं, Ck t p स निस्वनं (for स निःस्वनम्) —For 2-4 Ś1 Ñ V1 B D1-7 M4 subst

2093* तेन स्वनेन महता वर्धमानेन घोषिता ।
गुहा ससत्त्वजुष्टाभा निलिल्युर्वनवासिन ।
समुत्पेतु खगास्त्रस्ता मृगयूथाश्च दुद्रुवु ।
ऋक्षाश्चो संघशो वृक्षा प्रपेतुर्दर्यो गुहा ।
शाखामृगाश्च वित्रस्ता दुद्रुवुर्गजयूथपा । [5]
व्याघ्रकाश्च महासिंहा महिषाश्च व्यलोकयन् ।
विलानि विविशुर्व्याला स्वस्ति जेपुर्द्विजातय ।
विद्याधरा समुत्पेतु किंनरा भेजिरे दरी ।
तमभ्याशमनुप्राप्तं तस्योद्देशस्य लक्ष्मण ।
सैन्यस्यागच्छत शब्द इति रामे न्यवेदयत् । [10]

[(l 1) V1 D2-6 7 शब्देन (for स्वनेन) B4 वर्धमानेन (for वर्ध°) V2 D1 5 7 वध(D2 वद्ध D5 वर्धि)ता विप्र(D3 6 प्रति)-बो(V2 रो)धिता M4 वर्धताभिप्रबोधिता (for the post half) —(l 2) V1 B1 M4 गुदा (for गुहा) V1 B3(also as in text) 4 याला (for व्याघ्रा) Ñ2 विनिन्युर् B1 (also) विलिल्युर्, D2 3 D5 6 नि(D3 वि)लिन्युर् (for निलिल्युर्) D1 4 7 M4 बिल्वासिन (for वन°) V1 वनाच्छैलनिवासिन (for the post half) —Ś1 om l 3 4 D3 4 6 7 transp l 3 and 4 —(l 3) D2-6 7 खमुत्पेतु (for समुत्पेतु) B3 D4 6 7 त्रस्त (for त्रस्ता) V1 D2 3 6 7 M4 वि(D4 5 7 वि)दुद्रुवु D5 दुद्रुवुर्गजयूथपा (for the post half) —(l 4) D5 ससृजुर् (for [उ]त्ससृजुर्) D6 ऋक्षाश्चो सारदः क्षाम्यान् (for the prior half) Ñ1 B4 प्रपेतुर्, D1 3 मारुतुर (for प्रपेतुर्) D4 7 गुहां (for गुहा) —(l 5) Ś1 D4 दवानपेव V1 D1-6 7 M4 न(M4 द) शाखिभय D2 3 6 संत्रस्ता (for वित्रस्ता) V1 D1 6 7 M4 दा(M4 द)शाखिभयविह्वला (for the prior half) M4 बभ्रमुर् (for दुद्रुवुर्) Ñ1 गजयूथा (subm) D5 मृगयूथपा (for गज-यूथपा) —(l 6) V1 विनिभन D3 व्याघ्रमन (sic) D5 व्याघ्र मत D7 व्याघ्रमत (sic) D5 [अ]वलोकयन् (for व्यलो°) —V1 D1 M4 om l 7-10 D3 om l 7 —(l 8) Ñ1 जेपिरे (sic) (for भेजिरे) D1 2 7 गिरि (for दरी) —(l 9) B1 (also) तत्र (for तम्) Ñ1 B1 2 4 D5 आया(Ñ1 D5 °या)सम् (for अभ्याशम्) B1 3 अनुप्राप्त (for अनुप्राप्तं) Ñ1 B3 अभ्यासे प्रतिपाप (for the prior half) Ś1 Ñ1 D4 6 7 देशस्य B3 [उ]द्देशस्य (for [उ]द्देशस्य) —(l 10) Ś1 D4 6 7 शब्दम् (for शब्द°) Ś1 D5 सत्त्व (for इति) B3 रामं (for रामे)]

हन्त लक्ष्मण पश्येह सुमित्रा सुप्रजास्त्वया ।
भीमस्तनितगम्भीरस्तुमुलः श्रूयते स्वनः ॥ ५
राजा वा राजमात्रो वा मृगयामटते वने ।
अन्यद्वा श्वापदं किंचित्सौमित्रे ज्ञातुमर्हसि ।
सर्वमेतद्यथातत्त्वमचिराज्ज्ञातुमर्हसि ॥ ६
स लक्ष्मणः संत्वरितः सालमारुह्य पुष्पितम् ।
प्रेक्षमाणो दिशः सर्वाः पूर्वां दिशमवैक्षत ॥ ७
उदङ्मुखः प्रेक्षमाणो ददर्श महतीं चमूम् ।
रथाश्वगजसंबाधां यत्तैर्युक्तां पदातिभिः ॥ ८
तामश्वगजसंपूर्णां रथध्वजविभूषिताम् ।
शशंस सेनां रामाय वचनं चेदमब्रवीत् ॥ ९
अग्निं संशमयत्वार्यः सीता च भजतां गुहाम् ।
सज्यं कुरुष्व चापं च शरांश्च कवचं तथा ॥ १०

G 2 106 11
B 2 96 14
L 2 110 11

5 For subst in Ś1 Ñ V3 B D1 7 M4 cf v l 6 —c) Ce k t भीम (as in text) Dg1 Dt1 Dd1 Dm1 Ct -गम्भीर Cg k -गंभीर (as in text) T1 2 G2 M1 मही स्वनित गम्भीर(G2 °र) T3 G3 M2-4 Cg p मही(G3 °हाँ, M2 °हत्) स्तनितगभीर(G3 °रैस, Cg °र) G1 भद्रस्तनितगंभीर —d) Dd1 Dm1 T3 G2 3 M1 2 Ch तुमुल (for तुमुल) M1 स्वर —After 5 Dg1 Dt1 Dd1 Dm1 T G M1-3 ins

2094* गजयूथानि वारण्ये महिषा वा महावने ।
विश्रासिता मृगा सिंहै सहसा प्रद्रुता दिश ।

[(l 1) Dd1 च (for वा) G1 गजयूथा स्वारण्ये (for the prior half) Dm1 महिषो, G2 महिष (for महिषा) —(l 2) M3 सहसा, Ct as above (for सहसा)]

6 a) Dg1 Dt1 Dd1 Dm1 T1 2 G2 M2 3 पुत्रो, Cg as in text (for -मात्रो) —c) G M1 अन्य, Ch t as in text (for अन्यद्) —After 6cd, Dg1 Dt1 Dd1 Dm1 T G M1 3 ins

2095* सुदुश्चरो गिरिश्चायं पक्षिणामपि लक्ष्मण ।

[G1 सुदुस्तरो (for °दुश्चरो)]

—e) G2 -वृत्तम् (for -तत्त्वम्) —f) Dt1 समभिज्ञातुमिहार्हसि —For 5-6 Ś1 Ñ V1 B D1 7 M4 subst and read l 3 4 after 2100*

2096* तमुवाचाग्रयो राम सुमित्रा सुप्रजास्त्वया ।
महास्वनोऽतिगम्भीर स त्वया ज्ञायतामिति ।
राजा वा राजपुत्रो वा वनेऽस्मिन्मृगया गत ।
मन्यसे वा यथातत्त्व तथा लक्ष्मण शास मे ।

[(l 1) Ś1 D4 ततो D1 [अ]ग्र्यो D3 M4 [अ]न्यो D4 [अ]मनो D7 [अ]क्षो (for [अ]ग्रयो) D3 तदा (for त्वया) —(l 2) Ñ B D1 4 5 7 महीं स्व(D1 स्त)नति गभीर V1 M4 मही(V1 °हा)स्तनितगभीर D3 महास्वरोऽतिगभीरं D5 महति स्वनगभीर (for the prior half) Ñ V1 B D1-3 5 M4 तत्त्व(D5 स्व च)विज्ञायतामिति (for the post half) —(l 3) M4 राजमात्रो V1 D1 M4 मृगयामटते(M4 °तो) वने (for the post half) —(l 4) D2 3 5 M4 च (for वा) V1 D1-5 7 M4 तथा शसत्व(V1 °साध, D3 °स च, D5 °सय) लक्ष्मण (for the post half)]

—B3 cont

2097* दृश्यते महती सेना हयवारणसंकुला ।

7 a) D3 om स (subm) Ś1 D6 च त्वरित, V1 सुत्वरित, D3 4 7 M4 सु(D4 स M4 तु)त्वरित, T तुत्वर (for संत्वरित) —b) V1 B Dg1 Dt1 Dm1 (before corr) शालमारुह्य Dm1 शीघ्रमा°, Ch t साल° (as in text) —c) Ś1 Ñ V1 B D1-3 M4 दिश(V1 °श) क्रमेण सर्वे(D6 °र्वा)श्च(Ñ1 B3 °पश्यन्) —d) Ś1 Ñ V1 B D1-4 M4 प्राचीं (for पूर्वां) G M1 Cm g उदैक्षत (for अवै°)

8 a) B1 उदङ्मुख, B3 उदङ्मुखे Ś1 Ñ V1 B D1-3 M4 स(V1 सु) समेक्ष्य (for प्रेक्षमाणो) —T3 repeats 8cd after 11 —c) Ś1 Dt1 D4 6 G1 3 गजाश्वरथ (by transp) Ñ1 रथाश्वरथ (sic) Ś1 Ñ V1 B D1-3 5 6 M4 -सपू(B3 °की)र्णां(V1 °र्णा) D4 ससुखां, D7 -सगुखां, G3 -साभेश्च (for -संबाधां) —d) V1 यत्तो (sic) B4 यानैर्, D2 M3 यत्रै G3 यत्तो, Cr m g k t as in text (for यत्तैर्) Ś1 Ñ V1 B D1 3 6 युक्ता(V1 °क्त) D4 6 7 पूर्णां (for युक्तां) T3 पताकिभि

9 a) Dt1 M2 3 तामश्वरथ —b) G3 M3 रथयानि, M2 गजध्वज —For 9cd, Ś1 Ñ V1 B D1 7 M4 subst

2098* स रामाय महाबाहो लक्ष्मण परवीरहा ।

[Ś1 D6 शशंसाशे (for स रामाय) B1 स रामोय नरयमो (sic) (for the prior half)]

—c) Ś1 Ñ V1 B D1-7 M4 भ्रातरं (for रामाय)

10 a) B1 श(m also) शंते, B3 शिखि, D1-3 7 अग्नीन्, Cg k t as in text (for अग्निं) B1 3 4 संशमयन्, B3 संयेशयतु (also as in text) D1 संविषयतु (sic) M4 संशमयस्व Cg k t as in text (for संशमयतु) Ś1 [आ]र्या G(ed) [आ]र्य (for [आ]र्य) —b) B1 Dt1 D5 G2 सीतां (for सीता) Ś1 Ñ1 D4 6 7 चाविशतां Ñ1 B वि(B3 चा also)विशता, V1 D1 5 संविशता (for च भजतां) —c) Dt1 Dd1 Dm1 M3 सज्जं, Cv g सज्य (as in text) G1 कुरु च, Cv r g as in text (for कुरुष्व) —For 10cd, Ś1 Ñ V1 B D1-7 M4 subst

2099* कुरु सज्ये च धनुषी कवचे धारयस्व च ।

[D5-6 7 सज्जे (for सज्ये) V1 D1 कुरुष्व सज्ये(D3 °ज्जे) धनुषी (for the prior half)]

G. 2 106 12
B 2 96 15
L 2 110 12

तं रामः पुरुषव्याघ्रो लक्ष्मणं प्रत्युवाच ह ।
अङ्गावेक्षस्व सौमित्रे कस्यैतां मन्यसे चमूम् ॥ ११
एवमुक्तस्तु रामेण लक्ष्मणो वाक्यमब्रवीत् ।
दिधक्षन्निव तां सेनां रुषितः पावको यथा ॥ १२
संपन्नं राज्यमिच्छंस्तु व्यक्तं प्राप्याभिषेचनम् ।
आवां हन्तुं समभ्येति कैकेय्या भरतः सुतः ॥ १३
एष वै सुमहाञ्श्रीमान्विटपी संप्रकाशते ।
विराजत्युद्गतस्कन्धः कोविदारध्वजो रथे ॥ १४
भजन्त्येते यथाकाममश्वानारुह्य शीघ्रगान् ।
एते भ्राजन्ति संहृष्टा गजानारुह्य सादिनः ॥ १५
गृहीतधनुषौ चावां गिरिं वीर श्रयावहे ।
अथवेहैव तिष्ठावः संनद्धावुद्यतायुधौ ।
अपि नौ वशमागच्छेत्कोविदारध्वजो रणे ॥ १६

---

11 ^{d}) Dg1 Dt1 T3 G1 M1 [ह]मा (for [मु]तां) M3 मन्यते —For 11, Ś1 Ñ V1 B D1-7 M4 subst

2100* नागाश्वरथसंपूर्णां तां चमूं संनिशाम्य स ।
राम पप्रच्छ सौमित्रिं कस्येमां मन्यसे चमूम् ।

[(l 1) Ñ B स निशम्य, V1 संनिवेत्य (sic) D4 संनिपम्य (for संनिशाम्य) Ñ B च (for स) D5 संविशाम्यत —(l 2) Ś1 Ñ1 सौमित्र M4 [ए]तां (for [इ]मां) B4 मन्यते (sic) (for मन्यसे)]

—Thereafter Ś1 Ñ V1 B D1-7 M4 read l 3 and 4 of 2096* —After 11 T3 repeats 8^{cd}

12 ^{a}) Ś1 Ñ V1 B D1-7 M4 [ऽ]थ (for तु) —^{c}) B4 Dd1 दिधक्षुर् (for °क्षन्) Ñ V1 B D1-6 7 M4 कोपेन Dd1 Dm1 G M1 सेनां तां (by transp) Ś1 D8 दिधक्षुरिव कोपेन, D2 दिधक्षवेधकोपेन (sic) —^{d}) Ñ V1 B D1 3 ज्वलित (B3 °ल्त [sic]) (for रुषित) Ś1 D4 ज्वलितो हव्यवाहन

13 ^{c}) G1 स (for तु) —For 13^{cd}, Ś1 Ñ V1 B D4 M4 subst

2101* सपत्नो राज्यकामोऽय व्यक्त राज्याभिषेचित ।

[V1 सदत्नो B2 4 M4 सापत्नो (B3 °त्नो) (for सपत्नो) Ñ1 B1 व्यक्त राज्येभिषेचिन, V1 M4 प्राप्य राज्याभिषेचन, D1 व्यक्त राज्याभि° (for the post half) Ś1 repeats from वै up to post half consecutively]
while D1-6 7 subst

2102* अकण्टकं राज्यमिच्छ प्राप्य मन्येऽभिषेचनम् ।

[D1 2 रु (for इच्छन्) D1 राज्य (for मन्ये)]

—^{c}) Ś1 Ñ1 V1 B2 3 4 D1-6 7 M4 इहाभ्येति Ñ2 B1 D4 इहाभ्ये° —^{d}) D2 om (hapl ?) सुत Ś1 Ñ B Dd1 Dm1 D1 भरत कैकयीसुत

14 T1 M2 read 14 twice —^{a}) Ś1 Ñ V1 B D1 2 4 T1 M1 (T1 M1 second time) एषो हि (B1 M4 च) T1 (second time) य) Dt1 एतु वै, D1 6 7 एषोस्य Cv g t as in text (for एष वै) Ś1 Ñ V1 B D1 4 T1 M1 (T1 M1 second time) सुमहास्कन्धो (for सुमहाञ्श्रीमान्) Ñ1 B4 om (hapl ?) 14^{bc} —^{b}) D1 6 7 Ch विटप

Cv r m g as in text (for विटपी) Dm1 [इ]व (for स) Ś1 D4 T1 (second time) [इ]व महाद्रुम, Ñ2 V1 B2 4 D1 M2 (second time) एष महाद्रुम, B1 सुमहाद्रुम —^{c}) Dt1 T2 उज्ज्वल Cv r m g as in text (for उद्गत) Ś1 Ñ2 V1 B1-3 D1 4 विराजति (Ś1 Ñ2 B3 D4 °ते) गजस्कन्धे (B1 °न्धो) D2 विद्वारयन्बलस्याय D3 विराजयन्बलस्याये, D1 6 7 विधा (D6 °दा) रयन्बलस्याग्र (D1 °ग्रे) T1 M1 (both second time) विराजति यथा (T1 M1 महा) सैन्ये —^{d}) B4 Dg1 D2 कोविदारो (Dg1 °र) Cg k t as in text (for कोविदार) Ś1 Ñ2 B D4 यथा Ñ1 D3 रणे, V1 D2 M1 महान् (for रथे) D1 6 7 कोविदारो (D1 °र) रथ (D7 °थे) ध्वज ‖ Cvp असौ हि सुमहास्कन्धो विटपीव महाद्रुम । विराजति महासैन्य (°न्ये ?) कोविदारध्वजो रथ । ‖ —After 14 Dm1 ins राम, सीता, लक्ष्मण

15 Ñ1 D3-5 7 om 15^{ab} —^{a}) B1 भवति, B3 T1 2 G M1 भ्रा (B3 also as in text) जति, M2 भ्राजते, Cr व्रजन्ति Cm g t as in text (for भजन्ति) Ś1 D4 च, M3 हि, Cg t as in text (for [ए]ते) V1 भजन्ते Ś1 V1 B1 2 D1 6 M1 4 [आ]कामम् (for °कामम्) D3 भजंत्येते म यथाकामे (sic) —^{b}) Ś1 D4 यथा वायुजवा द्रुता Ñ2 B यथाकामाञ्ज (B2 °मजा) वा द्रुता (B4 °ता), V1 भनु वै शीघ्रगामिन D1 थस्थाश्व शीघ्रगामिन, D4 मा वाश्व शीघ्रगामिन —^{c}) Ñ B राजन्ति (for भ्रा[जन्ति]) —^{d}) Ś1 Ñ V1 D1-7 M4 हयान् (for गजान्)

16 D2 om 16 —^{a}) Dg1 Dt1 Dm1 M3 4 भ्रातौ (for चावां) —^{b}) T2 [आ]श्रयावहे, K (ed) श्रयावहै —After 16^{ab}, Dd1 reads 17^{ab} —^{c}) G2 चेह (for [इ]हैव) —^{d}) G1 उद्यतायुधौ —For 16^{c-d}, Ś1 Ñ V1 B D1 3 4-7 M4 subst and read before 15^{cd}

2103* गृहीतधनुषश्चावां योधा सज्जौ भवावहे ।
अथवा त्वं गिरिगुहां सभार्यं प्रविश राघव ।

[D1 6 7 om l 1 —(l 1) Ś1 D4 चापि V1 वीरा D1 2 योधा (D2 °धौ) M4 चापम् (for चावां) V1 D1 3 वीर (D1 °रा) जैर्न श्रयावहे (V1 °वहे), M4 भजाव गिरिमाश्रय (for the post half) —(l 2) D1 7 अथ वान्यं V1 प्रविशस्व च D2 3 6 7 सभार्यो वैद्रुम[ि]ति (for the post half)]

अपि द्रक्ष्यामि भरतं यत्कृते व्यसनं महत् ।
त्वया राघव संप्राप्तं सीतया च मया तथा ॥ १७

यन्निमित्तं भवान्राज्याच्च्युतो राघव शाश्वतात् ।
संप्राप्तोऽयमरिर्वीर भरतो वध्य एव मे ॥ १८

भरतस्य वधे दोषं नाहं पश्यामि राघव ।
पूर्वापकारिणां त्यागे न ह्यधर्मो विधीयते ।
एतस्मिन्निहते कृत्स्नामनुशाधि वसुंधराम् ॥ १९

अद्य पुत्रं हतं संख्ये कैकेयी राज्यकामुका ।
मया पश्येत्सुदुःखार्ता हस्तिभग्नमिव द्रुमम् ॥ २०

G. 2. 106. 23
B. 2. 96. 26
L. 2. 110. 26

—Thereafter Ñ2 B2.3 (in marg.) 4 cont., Ñ1 B1 subst. for 16[cd]:

2104* अस्मान्द्रष्टुं समायातः कोविदारध्वजो रणे ।

[B4 वने (for रणे).]

—Then B2.3 (marg.) 4 further cont., while V1 D1 cont. after 2103*:

2105* सुभ्रकं राघवी सेना नाग कार्या विचारणा ।
अथ स वारणो मत्तः पितुर्मे सततं प्रियः ।
एते चाश्वाः सुमन्त्रेण ये नीतास्ते वनात्पुरा ।
पितुर्दशरथस्यैते सततं मनसः प्रियाः ।
एतस्मै महत्सैन्यं भरतेन समाहृतम् । [5]

[(l. 2) V1 -[उ]न्मत्त (for मत्त) —(l. 4) V1 D1 [र]मा (D1 °मे) (for [ए]ते). D1 संतत]

—[b]) V1 B2–4 D1.2.4.5.7 M1 सो T2 नो (for नौ). Ś1 D6 अपि मेत्र समागच्छेत्. —[c]) B3 ध्वजे (sic) (for °जो). —After 16, Ś1 Ñ V1 B D1–7 M1 ins.:

2106* समन्तात्परियातोऽसि राम शैलमुपाश्रय ।

[Ś1 D6 परियातास्ते, V1 D1.3 प्रतिह (V1 °हृ)तास्त, B1.3.4 परियातोसि, D2 परियात्यरिस्न्, D4.7 परियातास्म, D5 परियातारस्मान्, M1 परियातो (for °यातोऽसि) D2.6 राजन्, D4.7 भ्रातन् (for राम) Ś1 D4.6.7 उपाश्रित, Ñ1 V1 B1 D3 अपाश्रय, B4 समाश्रय]

—Thereafter Ś1 D4.6.7 cont.:

2107* यद्वोपयेदुचितं सर्वं तत्करिष्यामि राघव ।
अहोकः करिष्यामि त्वत्प्रियस्योचितं यथा ।
अद्य मत्कार्मुकोत्सृष्टा शरा कनकभूषणा ।
पास्यन्ति रुधिरं नूणां हृदयाद्विवरादिव ।

17 Dd1 reads 17[ab] after 16[cd]. —[a]) Ñ2 D1.4.5.7 पश्येम; G1 M1 द्रक्ष्यार (sic), Cv.g.k as in text (for द्रक्ष्यामि). —[b]) D2.7 यत्कृतं (for यत्कृते) —For 17, Ś1 Ñ2 V1 B D3.6 M2 subst., while D1.2.4.5.7 subst. l. 2 for 16[cd].

2108* अपि पश्येयमद्याहं भरतं यत्कृते महत् ।
राघव त्वमिदं प्राप्तो दुःखं यै रहितो मया ।

[(l. 1) Ñ2 B3 अपि पश्येह सर्वे (B3 °मद्य)ह, V1 अपि वत्स्यनमाद (sic), B4 अपि पश्येयमथाद (sic) (for the prior half). D6 यत्कृतं (for यत्कृते). —(l. 2) Ś1 D6 इद (for इदं) D1 त्वं * राघव संप्राप्तो, D2–4.7 M1 इद (D2 द, D4.7 त्वं) राघवेह समाप्त (D2.7 °स). D5 त्व राम चेह समाप्तो (for the prior half) V1 D1 हि (for यै). D2 दुःख चोपहत मयि, D4.5.7 दु ख चोपहि (D5 °ह)त मयि (for the post. half).]

18 [a]) Ñ2 भयाद्; D2.3.6 च्युतो (for भवान्). V1 यन्निविष्टे भयाद्राज्यात्. —[b]) V1 सततात्; B1 शासनात् (for शाश्वतात्). D1 भवान्धर्मवतां वरः; D3 भवान्धर्मपरायण; D4.7 च्युतो धर्मभृतां वर; D6 भवान्धर्मभृतां वरः. —[c]) Ñ1 V1 B3.4 स प्राप्तो (for संप्राप्तो). Ñ V1 B D1–6.7 M1 पापो (for वीर). —[d]) D2.7 भवतो (for भरतो). Dg1 Dt1 हि; Ck as in text (for मे). Ñ V1 B D2.6.7 M1 बाणगोचरं (V1 B4 °रः) (for वध्य एव मे). —For 18, Ś1 D6 subst.:

2109* यत्कृते त्वमितो राज्यात् प्रच्युतो रघुनंदन ।
स संप्राप्तोऽयमत्र पापो भरतो बाणगोचरम् ।

19 [ab]) B1 तेन तस्य (for भरतस्य). Ñ1 नाहं दोषं (by transp.), V1 Dd1 Dm1 दोषं न हि (for दोषं नाहं). —Ñ2 B D2 om. 19[cd]. —For 19[cd], M4 reads 19[ef] repeating it in its proper place. —[c]) Ś1 -[अ]पहारिणं; Ñ1 V1 Dt1 D2–4.6.7 -[अ]पकारिणं, Ck -[अ]पकारिणां (as in text). Ś1 V1 D1–4.6.7 हन्यात्; Ñ1 त्यागे, Dt1 हत्वा; Cg.k as in text (for त्यागे). —[d]) Ś1 D6 धर्मोयं तु विधीयते; Ñ1 धर्मेर्थेविविनायते (sic), V1 D1.3 इति धर्मो विधीयते; Dt1 न ह्यधर्मेण युज्यते, D4.7 धर्मो ह्यपि (D4 °पि) विधीयते. —After 19[cd], Ś1 Ñ1 V1 Dg1 Dt1 Dd1 Dm1 D2.3.4.6.7 S (M4 after the first occurrance of 19[ef]) ins.:

2110* पूर्वापकारी भरतस्त्यक्तधर्मश्च राघव ।

[G2 damaged from र्वा up to रा. V1 च तथा (for भरतः). Dt1 Ct त्यागे (for त्यक्त-). Ñ1 V1 D1.3 -धर्मो (for -धर्मश्च). Dt1 राघव.]

—D4 om. 19[e]–22[b]. —[e]) D2 निहिते, M3 अंतरे (for निहते). Ñ B1.2 M1 (first time) [ऽ]द्य त्वम्; B3 त्वां त्वम्; B4 ह्यद्य (for कृत्स्नाम्). Ś1 D6–7 तस्मिन्निपतितेऽद्य त्वं (D6.7 °त्वम्) —D2 om. from 19[f] up to 20[a]. —[f]) Ñ1 अनुशास (sic), D2 अनुशासि (sic) (for °शाधि).

20 D1 om. 20, D2 om. 20[c] (for both cf. v.l. 19). D3 om. from 20–25. —[a]) Ñ2 B3 अत्र (for अद्य). V1 B4 पुत्रहतं, D2 भर्तृ हत (for पुत्रं हतं). T2 यत्र सक्ते (sic), Cg.t as in text (for संख्ये). Ś1 D6 अथ पुत्रे (Ś1 °त्र) हते सति. —[b]) Ś1 Ñ B D6 राज्यकामिनी; V1 पुत्रकामिका, D7 राज्यवर्द्धिनी. —G3 illeg. from सु up to *.

G. 2. 106 24
B, 2, 96. 26
L 2. 110 27

कैकेयीं च वधिष्यामि सानुबन्धां सबान्धवाम् ।
कलुषेणाद्य महता मेदिनी परिमुच्यताम् ॥ २१
अद्येमं संयतं क्रोधमसत्कारं च मानद ।
मोक्ष्यामि शत्रुसैन्येषु कक्षेष्विव हुताशनम् ॥ २२
अद्यैतच्चित्रकूटस्य काननं निशितैः शरैः ।
भिन्दञ्शत्रुशरीराणि करिष्ये शोणितोक्षितम् ॥ २३
शरैर्निर्भिन्नहृदयान्कुञ्जरांस्तुरगांस्तथा ।
श्वापदाः परिकर्षन्तु नरांश्च निहतान्मया ॥ २४
शराणां धनुषश्चाहमनृणोऽस्मि महावने ।
ससैन्यं भरतं हत्वा भविष्यामि न संशयः ॥ २५

इति श्रीरामायणे अयोध्याकाण्डे नवतितमः सर्गः ॥ ९० ॥

—^{c}) Ś1 Ñ V1 B D1-3 6 7 M4 मया (Ś1 D6 7 पुत्र, V1 इम) पश्यतु दुःखार्ता —^{d}) Dt1 T2 मिश्रम् (for भ्रमम्)

21 D4 5 om 21 (cf v l 19 and 20 respy) G2 damaged up to मि in वधिष्यामि —^{a}) Ś1 Ñ2 V1 B D1-3 6 7 M4 हनिष्यामि, T (cd) हरिष्यामि (for वधि°) —^{b}) D3 सानुबधीं (sic) (for °बन्धां) V1 सवाधवा, B4 om G2 सराघवा, M4 सहान्वया (for सबान्धवाम्) —^{c}) V2 B2 पौरुषेण, D1 Cv कल्मषेण, Cr m g k t as in text (for कलुषेण) —^{d}) Ś1 D1-3 6 7 M4 सम्प्रमुच्यता, B4 सम्प्र ली**, M3 परिमुच्यते V1 मेदिनीं सम्प्रदीयता

22 D4 om 22^{ab} (cf v l 19) D5 om 22 (cf v l 20) —^{a}) D7 [अ]ह, G1 2 M3 ते, M4 [इ]द (for [इ]म) Ś1 Dg1 D6 7 सचिव, V1 संयते (sic) B2 T1 सयत, T2 सयति, G1 3 सु(G3 स)भ्रम, G2 M1 सम्भृत, Cr m g as in text (for संयत) B1 अद्येमान्संयतक्रोधान् —^{b}) T1 असत्स्कार च T2 G3 मत्सर चैव, M4 अहंकार च, Cr g k t as in text (for असत्कार च) Ś1 V1 D1 D1-3 4 राघव, T3 मानव, Cg as in text (for मानद) D7 समरार्थेषु राघव —^{c}) Ś1 V1 D1-4 6 7 प्रतिमोक्ष्या(D2 °योरस्या)मि योधेषु, Ñ B मोक्ष्यामि बाणान् (B1 °ण)योधेषु M4 मोक्ष्यामि सैन्ये यौधेषु —^{d}) B4 Dg1 D3 4 हुताशम

23 D5 om 23 (cf v l 20) G2 damaged from ट in 23^a up to शरीराणि in ^{c} —^{a}) D3 3 अय (for अद्य) Ś1 [पृ]व, Ñ2 B D6 7 M4 [इ]द, V1 D1 2 6 [इ]मं, Dg1 Dt1 Dd1 Dm1 T3 M3 [पृ]व, D2 मे, Cg as in text (for [ए]तच्) —^{b}) B3 निश्चित शरैः (also निशितैः शरैः) —^{c}) Ś1 D1 3 4 D6 छिन्दन्, Ñ1 छिन्न्, Ñ2 छिद, V1 भान, B3 भिद (also छिन्दन्), Dt1 Dd1 Dm1 छिन्दन्, Cg as in text (for भिन्दञ्) Ñ2 B3 शरीरणा(B3 also as in text) (for °णि) —^{d}) Ś1 Ñ V2 B D1 4 6 7 M4 शोणितोदक(D4 °क) T2 शोभितोदितं(sic)

24 D5 om 24 (cf v l 20) —^{a}) V1 शरीर (for शरैर्) B1 D1-3 विभिन्न, G1 निपण्ण (for निर्भिन्न) Ñ2 V2 B D1 3 7 M4 हृदया (for °यान्) —^{b}) D2 युधि (for तथा) Ñ2 V1 B D1 3 7 M4 कुञ्जरास्तुरगास्त(Ñ2 °थ)था —D1 om 24^{cd} —^{c}) Ś1 D6 सूतादिराय भक्षता N V1 B D1 2 M4 श्वापदैः परि(V1 D1 3 °दैरप, D4 °दैरपि)कृ(B3 °हृ)ष्यता, D4 7 श्वापदैरार्य भक्ष्यतां —^{d}) D1 3 6 7 युधि (for मया) Ś1 D6 नराश्चवहिद्(D6 °हि)ता युधि, Ñ V1 B D1 3 M4 नरा(Ñ1 नरा, B3 [also] नागा)श्च निहता मया(V1 D1 3 युधि) —After 24, M4 ins 2111*

25 D5 M4 om 25 (For D5 cf v l 20) —^{a}) Ś1 D3 6 शाण(Ś1 °णा [sic]) B4 धनुषा (for °षश्) —^{b}) Ś1 Dt1 Dd1 Dm1 D1 6 7 T G1 2 M3 [ऽ]स्मिन्, Ñ V1 B D1 2 [ऽ]द्य, D3 [ऽ]ह, Cg as in text (for ऽस्मि) Ñ2 B D3 M2 महाहवे, D2 °बल, T1 2 G 3 M3 Cr g °मृधे (for °वने) —^{c}) Ñ2 ससैन्य, D1 सगण, D4 सघन (sic) D7 सभृत (for ससैन्य) —^{d}) Ś1 Ñ B D6 भवेय नात्र, V1 D1-4 7 भविष्ये नात्र (for भविष्यामि न) —After 25, Ś1 Ñ V1 B D1 4 6 7 M4 (after 24 owing to om) ins

2111* प्रमथितहयनागा स्यन्दनोत्क्षिप्तचक्रा
निशितविनरगात्रा शोणितार्द्रा नरेश ।
भरतनृपचमूः स्व द्रव्यमीरच्छयानः
मृगगणनृपभक्ष्यामद्य मद्वाणभिन्नाम् ।

[(l 1) D1 प्रमय* (sic) V2 हन (for °हय) B4 नाग (for नागा) B4 चक्री D1 7 श्यान(D7 श्रन)नाद्भिन्नचक्रा(D7 °क्रे) (for स्यन्दनोत्क्षिप्तचक्रा) —(l 2) Ñ1 illeg Ñ2 V1 B2 प्रमथित Ñ2 नरगाणा (sic) Ñ2 नरगात्रा (for नरगात्रा) Ś1 शोणिताद्री Ñ1 B1 °तोर्द्रा (for °तार्द्रा) V2 शोणिताद्रमशा D1 7 विनिश्चितरथोर्घा महनार्थां सुघ्र —(l 3) V2 transp भरत and नृप M4 तो (for ह) Ś1 D1 6 7 भरतनृपसेना (for °चमू ह) Ś1 D6 पश्य भेमा (for द्रव्यमीरा) D2 द्रव्यगे संशयानां, D1 7 पश्य रामाणयानां (for द्रव्यमीरच्छयानां) —(l 4) B1 om नृप Ś1 Ñ B D6 भुक्ताम् D1 भोज्याम् (for भक्ष्याम्) V1 D1 गजगृहप(D1 om पृ)भो दग्, D6 मद्य बाणभोज्याम्, D1 7 समरवरभोग्याम

९१

सुसंरब्धं तु सौमित्रिं लक्ष्मणं क्रोधमूर्छितम् ।
रामस्तु परिसान्त्व्याथ वचनं चेदमब्रवीत् ॥ १
किमत्र धनुषा कार्यमसिना वा सचर्मणा ।
महेष्वासे महाप्राज्ञे भरते स्वयमागते ॥ २
प्राप्तकालं यदेषोऽस्मान्भरतो द्रष्टुमिच्छति ।
अस्मासु मनसाप्येष नाहितं किंचिदाचरेत् ॥ ३

G 2 107 4
B 2 97 13
L 2 111 4

Colophon D5 om —*Sarga name* Ś1 Ñ1 D1.6 लक्ष्मणकोप (Ś1 °प), Ñ2 B लक्ष्मणक्रोध ; V1 शालारोहण, D4 भरतसैन्यशैलारोहण D5 लक्ष्मणशालारोहण, D1.7 लक्ष्मणगर्जन (D7 °न) —*Sarga no* (figures words or both) Ś1 Ñ1 B1 D1.6 om Ñ2 106 V1 D6 102 B2 93 B3 D2.7 M4 104 D4 100 Dg1 Dt1 Dd1 Dm1 T G1.2 M1-3 96 D1 158 G3 damaged —After colophon G1.2 conclude with श्रीरामाय नम

91

Dm1 begins with ॐ, M1.2 with श्रीरामाय नम

1 [a]) Ś1 D6 सक्रोध, Ñ B1-3 D1 M4 असक्रु(Ñ1 °क्रो [sic])द्ध(D1 °द्ध) V1 B4 सुसहृद्ध (for सुसंरब्धं) Ś1 D6 च (for तु) B3 Dd1 सौमित्र, Dt1 Ct भरत, Cg as in text (for सौमित्रिं) D2.4.7 सौमित्रिमभिजल्पतम् —[b]) D2.3.4 अक्रुद्ध ; D1.7 सक्रोध (for लक्ष्मण) —[c]) Ś1 Ñ V1 B D2.3.6 M4 राम सत्त्व(D5 °क्त)मयामास, D3.4.7 राम प्रतिषमायेदं —[d]) D5 वचने (sic) (for °नं) D2.4.7 धर्मसंहित (for चेदमब्रवीत्) —After 1 Ś1 Ñ V1 B D1-7 M4 read 4[ab] (followed by 2113*)

2 [a]) B4 lacuna for कार्यं —[b]) Ś1 सासिना(for अ°) Ś1 D6 चर्मेरमणा Ñ1 सचर्मणा (subm) V1 D1 चर्मणापि वा Dm1 च सचर्मणा D2 G2 वाथ चर्मणा D3 चर्मणापि वा, D4 [अ]थ चर्मणा (subm), D6 वाथ चर्मणा D7 चाथ चर्मणा (for वा सच°) —[cd]) B1 D1 महाप्राज्ञे (for °प्राज्ञे) Dt1 महाबले महोत्साह Ś1 Ñ V1 B D1.6 M4 भ्रातरि (for भरते) Dg1 महेष्वासो महाप्राज्ञो भरत स्वयमागत , Cg as in text —After 2 Dg1 Dt1 Dd1 Dm1 T G M1.2 ins M1 ins l 1-12 only

2112* पितु सत्य प्रतिश्रुत्य हत्वा भरतमागतम् ।
किं करिष्यामि राज्येन सापवादेन लक्ष्मण ।
यद्द्रव्यं बान्धवानां वा मित्राणां वा क्षये भवेत् ।
नाहं तत्प्रतिगृह्णीयां भक्ष्यान्विषकृतानिव ।
धर्ममर्थं च कामं च पृथिवीं चापि लक्ष्मण ।   [5]
इच्छामि भवतामर्थे एतत्प्रतिशृणोमि ते ।
भ्रातॄणां संग्रहार्थं च सुखार्थं चापि लक्ष्मण ।
राज्यमप्यहमिच्छामि सत्येनायुधमालभे ।
नेयं मम मही सौम्य दुर्लभा सागराम्बरा ।
न हीच्छेयमधर्मेण शक्रत्वमपि लक्ष्मण ।   [10]
यद्विना भरतं त्वां च शत्रुघ्नं चापि मानद ।
भवेन्मम सुखं किंचिद्भस्म तत्कुरुतां शिखी ।
मन्येऽहमागतोऽयोध्यां भरतो भ्रातृवत्सल ।
मम प्राणात्प्रियतर कुलधर्ममनुस्मरन् ।
श्रुत्वा प्रव्राजितं मां हि जटावल्कलधारिणम् ।   [15]
जानक्या सहितं वीर त्वया च पुरुषोत्तम ।
स्नेहेनाक्रान्तहृदय शोकेनाकुलितेन्द्रिय ।
द्रष्टुमभ्यागतो ह्येष भरतो नान्यथागत ।
अम्बां च कैकेयीं रुष्य परुषं चाप्रियं वदन् ।
प्रसाद्य पितरं श्रीमान्राज्यं मे दातुमागत ।   [20]

[(l 1) Dg1 Dt1 T2 M2.4 आगते (for आगतम्) —(l 3) G3 damaged for द्रव्य बान्धवानां G2 M1 ब्राह्मणानां (for बान्धवानां) Dt1 T1 च M3 हि (for वा) Dg1 विप्राणां (for मित्राणां) —(l 4) T2 G1.2 M3.4 Cg भक्षान्, Dd1 Dm1 T1.3 G2.3 M1.2 यथा, Cg as above (for इव) —(l 5) M3 वापि (for चा°) —(l 6) Note hiatus between the two halves Dg1 T2 अर्थम् Cg as above (for °र्थे) T1 होनत्, M4 एतद (for एतत्) —(l 7) Dm1 संग्रहार्थं Cm g t as above (for संग्रहार्थं च) Dg1 (marg) वा सुखार्थं (for च सु°) —(l 9) G2 M3 नेषा, Ck as above (for नेयं) —(l 10) T1.3 न कामये धर्मेण (for the prior half) —(l 11) Dt1 Dm1 T2.3 G2 वापि, G1 अपि, M4 चैव (for चापि) —(l 12) G2 M1 भस्मतत् (for भस्म तत्) —(l 13) G1[ऽ]हम् (for ऽहम्) M2 नागतो येद्य (for आगतोऽयोध्यां) —(l 14) Dt1 प्राणे (for प्राणात्) —(l 15) G2 श्रुत्वा (for श्रुत्वा) M2 (after corr see m as above) प्रव्रजित —T2 om l 16 —(l 16) G1.2 M2 पुरुषोत्तम K(ed) पुरुषर्षभ —(l 18) M2 [प]व (for [प]न) M3 (आ)गत (for °त) —(l 19) Dg1 Dt1 केकयीं Dm1 Ck कैकेयीं Dd1 अवां च रुष्य कैकेयीं (for the prior half) Dg1 Dt1 T2 भरतां G2 तिरं (for पत्र) G2 प्रिय (for [अ]प्रिय)]

3 [a]) Ś1 D2.6 प्राप्तकाले, B1 D4.7 प्राप्तकाल M4 प्राप्य कालं Dt1 Ct यदीषोऽस्मान्, Dd1 यदेष्यो° (sic) G2 हि यदेष (for यदेषोऽस्मान्) B1 प्राप्तकालेऽपदेशोऽस्मान् —[b]) B4 D2.3.7 इच्छसि (sic) Dt1 Dd1 Dm1 अर्हति Cr g इच्छति (as in text) —After 3[ab], D5 wrongly repeats from 2[a] up to वा in 2[b] —[c]) Ś1 अस्मासु, B2.3 अस्मासु , D1 अस्मासु , G2 अस्माके (for °सु) B1 अस्मानोऽप्येष —[d]) T2 [अ]शुभं, K(ed) [अ]हितं (for [अ]हितं) Ś1 Ñ2 L D1.6 कर्तुम् ; D7 कर्मेह (sic) (for किंचिद्) Ś1 इच्छति, Ñ2 B3 आचरेत् ; D1 आहरेत् ; D6 अर्हति (for आचरेत्)

G 2 107 2
B 2 97 24
L 2 111 2

विप्रियं कृतपूर्वं ते भरतेन कदा नु किम् ।
ईदृशं वा भयं तेऽद्य भरतं योऽत्र शङ्कसे ॥ ४
न हि ते निष्ठुरं वाच्यो भरतो नाप्रियं वचः ।
अहं ह्यप्रियमुक्तः स्यां भरतस्याप्रिये कृते ॥ ५
कथं नु पुत्राः पितरं हन्युः कस्यांचिदापदि ।
भ्राता वा भ्रातरं हन्यात्सौमित्रे प्राणमात्मनः ॥ ६
यदि राज्यस्य हेतोस्त्वमिमां वाचं प्रभाषसे ।
वक्ष्यामि भरतं दृष्ट्वा राज्यमस्मै प्रदीयताम् ॥ ७
उच्यमानो हि भरतो मया लक्ष्मण तत्त्वतः ।
राज्यमस्मै प्रयच्छेति बाढमित्येव वक्ष्यति ॥ ८
तथोक्तो धर्मशीलेन भ्रात्रा तस्य हिते रतः ।
लक्ष्मणः प्रविवेशेव स्वानि गात्राणि लज्जया ॥ ९
व्रीडितं लक्ष्मणं दृष्ट्वा राघवः प्रत्युवाच ह ।
एष मन्ये महाबाहुरिहास्मान्द्रष्टुमागतः ॥ १०

4 Ś1 Ñ V1 B D1-3 M4 read 4^ab (followed by 2113* [except in D3 4 5 7]) after 1 —^a) D3 4 7 G1 अप्रिय (for वि°) Ś1 D4 6 7 नौ (for ते) D3 प्रिय कृत पूर्वं नो (subm), D6 अप्रियं न कृत पूर्वं —^b) D3 कदाचन (for कदा नु किम्) Ś2 D6 कदा नु भरतन किं (by transp) —^cd) G2 [ऽ]त्र (for ऽद्य) Dt1 Dd1 यद्विशकसे, T3 योत्र शकते (sic), G1 3 M2 योध्य शकसे, G2 यो विशकसे, M1 यत्र शाकसे, Cm g योत्र शकसे (as in text) D3 4 5 7 को (D3 ई)दृश वा भय तुभ्य भरताद्यत्र शंससि —For 4^cd, Ś1 Ñ (Ñ1 om) V1 B D1 2 6 subst M4 ins after 4^ab

2113* अनिष्ट भरतास्कि ते येन त्व हन्तुमिच्छसि ।

[V1 D1 3 M4 भय वा (for अनिष्ट) Ś1 D6 कि G(ed) नु (for ते) Ś1 त्वा (sic) Ñ2 V1 B4 D3 M4 त (for त्व)]

5 ^a) Ś1 Ñ V1 B D1-7 च (for हि) D3 om (subm) M3 वे (for ते) D6 [ऽ]निष्ठुर (for निष्ठुर) Ś1 B3 (after corr as in text) वाचो, T3 वाचे (sic) G3 M1 वापि, Cm g k t as in text (for वाच्यो) —^b) G3 M1 भरते Ś1 D3 4 7 नाहित, Ñ2 नाप्रिय, V1 विप्रिय, B2 (m also) वाप्रिय (for नाप्रिय) —After 5^ab, B3 ins

2114* भरतोऽपि गुणैर्युक्तो मदेवान्वहिते रत ।

—^c) Ś1 तु प्रियमुक्त, Ñ1 V1 ह्यप्रियमुक्त, D1-7 त्वप्रियमुक्त, G2 M1 2 ह्यप्रियमुक्त, Cr m g k t ह्यप्रियमुक्त (as in text) D3 M4 स्यात् (for स्या) —^d) V1 न क्षेमस्याप्रिये कृते; Dd1 भातस्य प्रिये कृते (sic)

6 ^a) Ś1 Ñ B1-3 D6 7 M4 तु पुत्र, V1 D3 4 5 तु पुत्र, B4 सुपुत्र, D1 सुतास्तु, D2 तु पुत्र (for नु पुत्रा) T3 पितर पुत्रा (by transp) —^b) Ś1 Ñ V1 B D1-7 M4 हन्यात्, D3 4 5 7 अर्थपरायण (for कस्यांचिदापदि) —^c) Ñ2 पितर (for भ्रातर) —^d) Ś1 Ñ V1 B1 2 D1 3 4 M4 प्रिय मात्मन, B4 प्रियदर्शन; D4 7 प्रियवादिन (for प्राणमात्मन)

7 ^ab) Ś1 D6 वा राज्यहेतोस्, M4 वा राज्यकामस् (for राज्यस्य हेतोस्) V1 B3 4 D1 3 M4 इमा वाच (for इमां वाचं) D3 प्रभाषते D3 4 5 7 कथं भ्रातः प्रवीप्ये (D3 °मानयीदे) वं तृ (?) वाचमिमा प्रति —^d) Ñ2 प्रदीयत (sic) (for °ताम्) D3 4 5 7 तव राज्यस्य कारणात्

8 ^a) B1 [ऽ]पि (for हि) —^b) Dt1 तद्वच, Cg as in text (for तत्त्व) V1 मया सौमित्रिलक्ष्मण (sic) —^c) V1 त्व (for [इ]ति) —^d) B2 वक्षति (sic) Dt1 मस्यते, D3 वक्ष्यते, M4 लक्ष्यति, Cg as in text (for वक्ष्यति) —After 8 Dm1 ins राम

9 ^a) G3 अथ, Cg as in text (for तथा) —^b) Ñ1 V1 B D1 M4 तेन, Dg1 D3 5 T3 भ्राता (for भ्रात्रा) Ñ2 B1 3 सत, G1 वाक्यं; Cg as in text (for तस्य) B1 2 हितेन स, D3 हितेरित —^cd) Ś1 प्रविवेशेत, V1 D1 °शाथ, B3 (after corr as in text) T3 °शेह, B4 °शत, Dd1 D4 7 °शैव, D3 °श्चैव, D6 °श्याथ (for प्रविवेशेव) M4 प्रविवेशेव गात्राणि लक्ष्मण स्वानि लज्जया —After 9 Ś1 Ñ2 B Dg1 Dt1 Dd1 Dm1 D6 S ins

2115* तद्वाक्य लक्ष्मण श्रुत्वा व्रीडित प्रत्युवाच ह ।
त्वा मन्ये द्रष्टुमायात पिता दशरथ स्वयम् ।

[(l 1) G3 transp लक्ष्मण and व्रीडित B4 T3 त, G1 3 हा (for ह) —(l 2) G3 ता Cr m g k as above (for त्वा) Ś1 D6 मन्ये त्वा (by transp) Dg1 आयात, Cg आयात (as above) Ś1 Ñ2 B D6 भ्राता ते भरत स्वय (for the post half)]

10 ^a) G3 व्रीडित (for व्रीडि°) —^b) Dd1 Dm1 भारत (for राघव) B1 T3 M2 त, G1 M1 (after corr sec m as in text) M4 (after corr pr m as in text) हा (for ह) —For 10^cd, Ñ1 D3-5 7 subst

2116* रामस्तु व्रीडित दृष्ट्वा लक्ष्मण पुनरब्रवीत् ।

[D3 रामस्थ (sic) Ñ1 प्रत्युरब्रवीत् (sic) D4 7 वाक्यमब्रवीत्] —^c) Ñ2 B1 2 D4 एवं (for एष) G1 त्व (for मन्ये) —^d) Ś1 V1 D1 4 अस्मान्द्रष्टुमिहागत (by transp); Ñ2 B अस्मान्द्रष्टुमुपागत —After 10 Ñ B1-3 D4 6 ins while V1 D1 subst l 2 only for 11^ab whereas M4 ins l 1 after 10 and subst l 2 for 11^ab

2117* अस्माकमनयं नेतुं वनाद्दृष्टुमुपागत ।
वनवासकृते दुःखं चिन्तयन्भ्रातृवत्सल ।

[D4 6 om (hapl) l 1 —(l 1) M4 transp नूनम् and नेतुं Ñ B3 M4 गृहावनम् (B4 °वनम्) (for वनाद्दृष्टुम्) —(l 2) B3 वने वासे, D3 भ्रातृवत्सल]

वनवासमनुध्याय गृहाय प्रतिनेष्यति ।
इमां नाप्येष वैदेहीमत्यन्तसुखसेविनीम् ॥ ११
एतौ तौ संप्रकाशेते गोत्रवन्तौ मनोरमौ ।
वायुवेगसमौ वीर जवनौ तुरगोत्तमौ ॥ १२
स एष सुमहाकायः कम्पते वाहिनीमुखे ।
नागः शत्रुंजयो नाम वृद्धस्तातस्य धीमतः ॥ १३
अवतीर्य तु सालाग्रात्तस्मात्स समितिंजयः ।
लक्ष्मणः प्राञ्जलिर्भूत्वा तस्थौ रामस्य पार्श्वतः ॥ १४
भरतेनाथ संदिष्टा संमर्दो न भवेदिति ।
समन्तात्तस्य शैलस्य सेना वासमकल्पयत् ॥ १५

G.2 107 17
B.2 97 29
L.2 111 15

—After 10, Dg1 Dt1 Dd1 Dm1 T G M1-3 ins

2118* अथवा नौ ध्रुवं मन्ये मन्यमानः सुखोचितौ ।

11 Ś1 Ñ B D2-7 transp 11ab and 11cd. —a) D6 वने वासम् (for वन°) Ñ2 D6 अनुध्यायन्; B4 उपाध्याय, D1.3 °ध्यासथा, D4 इह ध्यात्वा (for °ध्याय) —b) Ś1 Ñ D2.4.6 गृहाशे(Ñ2 °हे नेे)तुमिहागत, B1.3 D2.4.7 गृहे मे (D7 *)तुमिहागत, B2.4 गृह नेतुमुपा(B4 marg also °मिहा)गत —For 11ab, V1 D1 M4 subst l 2 of 2117* —After 11ab, D4 erroneously reads वनवास —c) Ś1 समेक्ष्य, Ñ B अप्येष, V1 D1.3.5 M4 च प्रेक्ष्य, Dt1 Dm1 D2.4.6.7 चाप्येष, G3 चापीह, M3 लालप्य (for नाप्येष) —d) Ñ B मुक्ति, D4.7 भक्ता (for अत्यन्त) Ś1 D2.4.6.7 -सेविता, Ñ B -लालिता, V1 वर्जिता, D1.3 -र्चिता, M4 भागिनीं (for सेविनीम्) —After 11 V1 Dg1 Dt1 Dd1 Dm1 D2 S ins

2119* पिता मे राघवः श्रीमान्वनादादाय यास्यति ।

[V1 M4 स्तोत्र, D1 अतोथ (for पिता मे) V1 D1 भरत (for राघव) V1 D1 M4 गृहम् (for वनात्)]

12 a) M4 इमौ (for एतौ) V1 वै (for तौ) —b) Ś1 B4 D2-7 शोभयतौ, D2 Ct p गात्र°, Cr m g k t as in text (for गोत्रवन्तौ) Ś1 D2-7 महाभुजौ (D6 °ज) Ñ V1 B D1.3 M4 महाबलौ, D8 महायतौ M4 महाजवौ (for मनोरमौ) —c) Ś1 D2.4.7 वायुवेगोपमैर्, V1 D1 °गौ महा, D3.5.6 °गोपमौ (for °वेगसमौ) Ś1 D4 नीतार्, Ñ B D2.6 M4 घोरार्, V1 D7 -वीर्यौ Dt1 D2.7 T2.3 G3 M3 धीरौ (for वीर) —d) G1 सात्त्वत, G3 जये नौ, Ck t as in text (for जवनौ) Ś1 D2.4.7 भमतो अवनैर्हयै, Ñ1 भमतो यवनोर्हयै (sic) Ñ2 B3.4 D2.4 M4 भमतो (Ñ2 °तौ) (sic) B2.4 °जौ, B3 °गौ) जवनौ हयौ V1 तथा सीमतरौ हयौ, B1 भमरौ नृपतेर्हयौ, D1.3 तथानिलजवौ हयौ (D3 °वै)

13 a) Ś1 Ñ1 V1 B2.4 D2-7 M4 एष वै स (B4 D1 M4 सु) Ñ2 B1.3 एष वैव, Dd1 Dm1 G M3 स एव हि, Cr m g t as in text, Ck स एव सु (for स एष सु) Ñ2 महाकारो, M4 महावपु (for °काय) —b) Ś1 Ñ V1 B D2-7 राजते (for कम्पते) V1 -पति (for -मुखे) —c) D1.3 शत्रुमयो (for शत्रु°) G1 राम (for नाम) —d) V1 D2.3 पितरं (for वृद्धस्त) Ś1 D2-7 सत्व ; B2 मे पितु (for धीमत) —After 13, Ś1 Ñ V1 B D1.3 M4 (after l 2 of 2121*) ins

2120* इति संभाषमाणस्तु रामः सौमित्रिणा सह ।
तां चमूं हर्षसंपूर्णां ददर्श सीतया सह ।

[(l 1) B1 संभाष्यमाणस्तु —V1 om from the post half of l 1 up to the prior half of l 2 —(l 2) B1 हर्षं, D1.3 हय (for हर्ष) B1.2.4 D3 -संपूर्णां, L(ed) -संपन्नां (for °र्णां)]

while Dg1 Dt1 Dd1 Dm1 S ins

2121* न तु पश्यामि तच्छत्रं पाण्डुरं लोकसत्कृतम् ।
पितुर्दिव्यं महाभाग संशयो भवतीह मे ।
इतीव रामो धर्मात्मा सौमित्रिं तमुवाच ह ।
वृक्षाग्रादवरोह त्वं कुरु लक्ष्मण मद्वच ।

[(l 1) G3 तव (for न) G3 M4 हि (for तु) G1 स चित्र (for तच्छत्र) T2.3 G M1-3 पांडुर Dt1 -निर्मल, Cg as above (for -सत्कृतम्) —(l 2) T1 महाबाहो (for °भाग). —After l 2 M4 ins 2120* —Dg1 Dt1 Dd1 T1 G1 M3 Cv r, g k t transp l 3 and 4 —(l 3) Dt1 धर्मात्मा Dt1 G3 प्रत्युवाच, Dd1 -मुवाच (for तमु°) G1 हा (for ह) —(l 4) Dd1 Dm1 G M1.4 वृक्षादस्मादवरोह त्वं (for the prior half) [Cv इतीत्यादि । भरतादागमनार्थं द्रष्टव्यम् । प्रमादादस्य विपर्ययः ।, Cr इतीति—प्रथममुत्तरार्धं योजनीयम् ।]

14 a) Ś1 Dg1 T2 M3.4 स, Ñ B D1-7 च, V1 om (subm) (for तु) Ś1 D4 शैलाग्रात्, Ñ V1 Dg1 D1.3.4.5.7 शाला°, D2 शाखाग्रात् (for सालाग्रात्) —b) Ś1 Ñ B1-4 D6 M4 लक्ष्मणो लक्ष्मणान्वित ; V1 B1 D1.2.4.6.7 लक्ष्मणो लक्ष्मया(B2 °*)न्वित, D1 लक्ष्मणो वीर्यवान्वित —c) G1.2 प्रणतो (for प्राञ्जलिर्) —d) G3 धीमत, Cg k as in text (for पार्श्वत) —For 14cd, Ś1 Ñ V1 B D1-7 M4 subst

2122* रामस्य पार्श्वमागम्य धीरमव्यग्रचोद्यत ।

[Ś1 Ñ1 D6 आगम्य, V1 D1-4.7 M4 अभ्येत्य (for आगम्य) B3 धीरस्, D4.7 वरि (for धीरम्) V1 D1 तस्थौ विविधाकृत, M4 तस्थौ प्रीतमनोगुण (for the post half)]

15 a) T1.2 M3 (भ)रि (for (भ)र) Ś1 B1 D4 T2 G1 संदिष्ट (sic) D2.3 Cr संदिष्टा, Cm g t संदिष्टा (as in text) —b) V1 D1 विमर्दो (for सं°) Ś1 Ñ B D1-6 मा D1 om (for न) —c) D1 समन्तात् (sic) Ś1 Ñ1 B D6 देशस्य (for शैलस्य) —d) D1-3.5 सैन्यस्य (D3 °न्य) (for सेना).

G 2 107 18
B 2 97 30
L 2 111 19

अभ्यर्धमिक्ष्वाकुचमूर्योजनं पर्वतस्य सा ।
पार्श्वे न्यविशदावृत्य गजवाजिरथाकुला ॥ १६

सा चित्रकूटे भरतेन सेना
धर्मं पुरस्कृत्य विधूय दर्पम् ।
प्रसादनार्थं रघुनन्दनस्य
विरोचते नीतिमता प्रणीता ॥ १७

इति श्रीरामायणे अयोध्याकाण्डे एकनवतितमः सर्गः ॥ ९१ ॥

९२

निवेश्य सेनां तु विभुः पद्भ्या पादवतां वरः ।
अभिगन्तुं स काकुत्स्थमियेष गुरुवर्तकम् ॥ १
निविष्टमात्रे सैन्ये तु यथोद्देशं विनीतवत् ।
भरतो भ्रातरं वाक्यं शत्रुघ्नमिदमब्रवीत् ॥ २
क्षिप्रं वनमिदं सौम्य नरसंघैः समन्ततः ।
लुब्धैश्च सहितैरेभिस्त्वमन्वेषितुमर्हसि ॥ ३

16 ᵃ) V1 अभ्यर्धम्, Dg1 T2 3 G3 अभ्यर्धम्, Cg k t as in text (for अभ्यर्ध°) —ᵇ) Ś1 V1 Dt1 D4 च, T इ (for सा) G1 2 पर्वते योजनस्य सा —ᶜ) Ś1 Ñ B D1 7 आवृत्य (B3 °स्य, B4 °त्य D6 °त्यां D7 °त्या) वासि (D1 वसि, D3 5 7 वसिथ) तारण्ये, V3 आवृत्य वसतारण्ये (sic) M1 आवृत्यवसदारण्ये —ᵈ) Dd1 Dm1 नर (for गज) Ś1 Ñ V1 B D1 7 M4 -रथाकुला (V1 °ल), Dt1 T G1 3 M1 3 -नराकुला, Dd1 Dm1 -गजाकुला

17 ᵃ) D4 5 7 चित्रकूटात्, D6 चित्रकूटात् (for °कूटे) M4 भरतस्य (for °तेन) D2 शाला, D3 सेन, D4 5 7 साला (for सेना) —ᵇ) Ś1 Ñ2 V1 B D1 7 M4 विहाय (for °धूय) —ᶜ) M3 प्रसाधनार्थं Ś1 Ñ V1 B D1-7 M4 प्रसादनार्थंय सदा (D5 °धा, D6 °द) गजस्य —ᵈ) Ś1 T1 M3 विराजते (for विरोचते) Ś1 D6 नीतिविदा, D1 नीतिरिव, B4 मातिमता (for °मता) Ś1 D6 प्रयुक्ता, B4 प्रणीत (sic) (for प्रणीता)

Colophon —*Sarga name* Ś1 D6 लक्ष्मणवाक्यं Ñ1 B1 2 शैला (B2 marg also सैन्या) रोहणं Ñ2 B3 सेनाधिरोहणं V1 D3 लक्ष्मणशत्रुघ्नयो, B4 चित्रकूटवर्णने, D5 भरतपर्वताधिरोहणं, D3 भरतप्रस्थाने लक्ष्मणानुनयो, D4 7 भरतप्रस्थाने लक्ष्मणवाक्य, D5 भरतपर्वताधि लक्ष्मणप्रतिबोध —*Sarga no* (figures words or both) Ś1 Ñ1 B2 D1 6 om Ñ2 107 V1 D4 103 B3 95 B1 104 B4 101 Dg1 Dt1 Dd1 Dm1 T G M1-3 97 D2 159 D3 7 M4 105 D5 106 —After colophon G concludes with श्रीरामाय नमः

92

☞ D4 5 7 missing for Sarga 92

1 V1 D2 3 om 1 while Ś1 Ñ B D6 M1 read 1 after 2 91 16 —ᵃ) B1 सेनास् (for °नां) Ś1 D6 M1 इ (for तु) B2 (m also as in text) G2 तत T1 शुचि (for विभु) G(ed) भरत (for तु विभु) —ᵇ) G1 मतिमतां (for पादवतां) —ᵈ) Ś1 D6 M1 गुरुवत्सलं, Ñ B °वर्तिनं T1 °मात्मनः, T2 G2 °वर्तिनं Cv r m g k t °वर्तकं (as in text)

2 D2 om 2ᵃᵇ —ᵃ) Ś1 Ñ B D6 निविष्टायां तु (Ñ1 च) सेनायां —ᵇ) Ś1 D6 यथादिष्टं Ñ B Dg1 यथोद्दिष्टं, V1 यथोद्देशे, G1 2 यथादेश, Ct as in text (for यथोद्देशं) D1 विनीतवान् —Before 2ᶜᵈ D3 reads 2 93 1

3 ᵃ) L(ed) इदं वनं (by transp) B1 lacuna for सौम्य —ᵇ) Ś1 Ñ V1 B D1 2 4 नरसिंह (Ś1 Ñ1 D6 °ह) T1 प्राणि° (for नरसंघै) Dg1 D1 समन्वितं (D1 °त) —ᶜ) G2 पर्वतस्य, Ck t as in text (for लुब्धैश्च) Ś1 Ñ V1 B D1-3 4 M1 लुब्धकै (V1 सलुब्धै) सहित (B1 2 4 °तै) सर्वैस —ᵈ) Ś1 D6 सम्, Ñ2 B2-4 D1 तम् (for त्वम्) D6 अर्हेति M3 damaged मर्हे in त्वमर्हसि —After 3 Ś1 Ñ B Dg1 Dt1 Dd1 Dm1 D6 S ins V1 D1 4 ins 1 3-4 and D2 ins 1 3 only

यावन्न रामं द्रक्ष्यामि लक्ष्मणं वा महाबलम् ।
वैदेहीं वा महाभागां न मे शान्तिर्भविष्यति ॥ ४
यावन्न चन्द्रसंकाशं द्रक्ष्यामि शुभमाननम् ।
भ्रातुः पद्मपलाशाक्षं न मे शान्तिर्भविष्यति ॥ ५
यावन्न चरणौ भ्रातुः पार्थिवव्यञ्जनान्वितौ ।
शिरसा धारयिष्यामि न मे शान्तिर्भविष्यति ॥ ६
यावन्न राज्ये राज्यार्हः पितृपैतामहे स्थितः ।
अभिषेकजलक्लिन्नो न मे शान्तिर्भविष्यति ॥ ७
कृतकृत्या महाभागा वैदेही जनकात्मजा ।
भर्तारं सागरान्तायाः पृथिव्या यानुगच्छति ॥ ८
सुभगश्चित्रकूटोऽसौ गिरिराजोपमो गिरिः ।
यस्मिन्वसति काकुत्स्थः कुबेर इव नन्दने ॥ ९

G 2 0 6
B 2 98 12
L 2 112 10

2123* गुहो ज्ञातिसहस्रेण शरचापासिधारिणा ।
समन्वेषतु काकुत्स्थमस्मिन्परिवृतः स्वयम् ।
अमात्यैः सह पौरैश्च गुरुभिश्च द्विजातिभिः ।
सह सर्वं चरिष्यामि पद्भ्यां परिवृतः स्वयम् ।

[Dt1 reads twice] 1-2 —(l 1) Ñ B1-3 Dg1 Dt2 Dd1 Dm1 T G1 M2 धारिता (for धारिणा) —(l 2) T2 अन्वेषयिष (sic) (for समन्वेषतु) Ś1 D5 वने वसंत काकुत्स्थम्, Ñ B वने मार्गतु(B2 [m also] °नेविष्य तु) काकुत्स्थम् (for the prior half) Ś1 Ñ B D5 तथा (for स्वयम्) —After l 2 Dm1 ins राम —Ś1 Ñ B1 D5 om B2 reads in marg whereas M3 reads twice l 3-4 —(l 4) V1 सहसा च, B2-4 D1 3 सह सैन्येः, K(ed) वन सर्वे (for सह सर्वं) D3 सह (for स्वयम्)]

4 a) Ś1 Ñ B D1 3 5 transp यावन्न and रामं Ś1 Ñ B Dd1 Dm1 Dt 3 5 पश्यामि (for द्रक्ष्यामि) V2 राघवं वा न पश्यामि, D2 सोऽहं सर्वेश्वरं रामं, M3 यावद्रामं न(by transp) पश्यामि —D3 om (hapl) from 4b up to द्रक्ष्यामि in 5a —b) Ś1 Ñ B D3 5 M1 च (for वा) G M1 महारथं (for °बलम्) —c) Ś1 V2 V1 B D3 5 M1 च, M3 inf lin sec m (for वा)

5 D3 om up to द्रक्ष्यामि in a (cf 1 4) 1 3 4 D3 om (hapl) 5 Dg1 transp 5 and 6 L(ed) reads 5 for the first time here within brackets and repeats it after 2125* —a) M3 तु (for न) G1 न यावन्न (by transp) —b) Ś1 Ñ B1 3 D5 पश्यामि (for द्रक्ष्यामि) V1 भ्रातुराननं (for शुभमा°) Dg1 Dt1 T1 M2 3 Ch तत्र (Dt1 T1 तद्) द्रक्ष्यामि(M2 द्रक्ष्यामि च) शुभाननं —c) V1 भ्रातरं (for भ्रातुः) Dg1 Dt1 T1 विशालाक्षं (for °पलाशाक्षं) —After 5 Dg1(marg) Dt1 Dd1 Dm1 T1 2 G1 3 M1 3 ins Ñ V1 B D1-3 T1 G2 M2 4 ins after 7

2124* सिद्धार्थं खलु सौमित्रिर्यश्चन्द्रविमलोपमम् ।
मुखं पश्यति रामस्य राजीवाक्षं महाद्युति ।

[(l 1) Ñ1 B2 4 T2 यत् (for यः)] Ñ V1 B D1 3 विमलं मुखं, M4 विमलाभम् (for विमलोपमम्) D3 पद्मदलप्रभं मुख (for the post half) —(l 2) Ñ V1 B D1 3 यत्र D3 यत्र (for मुख) D3 पश्येत (sic) (for पश्यति) B1 अवाक्षं च (for राजीवाक्षं) V1 D1 महाद्युते, B1 Dg1 Dd1 Dm1 T1 °द्युतिं, B4 D1 M3 °द्युति (for °द्युति) D3 राजीवाक्षमहाद्युते (sic) (for the post half)]

—After 2124*, D3 ins 2125* for the first time repeating it after 6

6 Dg1 transp 5 and 6 M3 om (hapl) 6-7 V1 om (hapl) 6 —a) B1 भ्रातुश्चरणौ (by transp) —c) Ś1 Ñ B Dt1 Dd1 Dm1 D1-3 5 T1 2 G M1 3 4 प्र(Ñ1 तु, Ñ2 B1 3 तु, B2 4 M4 न, D1 3 M3 स)ग्रहीष्यामि, Cg as in text (for धारयिष्यामि) —After 6 Ś1 Ñ B D1 3 (second time) 5 M3 ins while V1 ins after 5 (owing to om)

2125* परिष्वज्य भुजाभ्यां च यावन्न वदता वर ।
सत्करिष्यति धर्मात्मा न मे शान्तिर्भविष्यति ।

[(l 1) Ś1 D5 परिष्वज्य, B1 परिसृज्य (for °ष्वज्य) Ś1 B1 D5 तु B2 D1 3 (both times) M1 मां B1 om (subst) (for च) V1 च जानुभ्यां (for भुजाभ्यां च) Ñ दन्तां, B2 भूभुजां (for वदता) —(l 2) Ś1 D5 स करिष्यति V2 तस्क° (for सत्क°) Ś1 lacuna for भविष्यति]

— After 2125* L(ed) repeats 5

7 M3 om 7 (cf 5 1 6) —a) B4 om राज्ये Ñ1 D1 3 राज्यार्हे, V1 °र्हं (for राज्यार्हः) —b) Ś1 D5 स्वर्गे, V2 हि स्थित (for स्थित) —c) V1 Dt1 अभिषिक्तो (for °षेक) Ñ1 -जलाक्लिन्नो, P1 -जले क्लिन्नो, Dm1 -जलैः क्लिन्नो (sic) D3 -जलाक्लिन्नो (for -जल°) Ś1 D5 न निवेक्ष्यति काकुत्स्थो राजीवाक्षो महाद्युति —After 7 Ñ V1 B D1 3 T1 G2 M2 4 ins 2124*

8 a) Ś1 Ñ2 V1 B D1 3 5 M3 कृतकार्या (for °कृत्या) —cd) V1 D1 3 पृथिव्याः सागरान्ताया (for c) V1 भर्तारं (for पृथिव्या) D1-3 M3 भर्तारमनुगच्छति (for d) Ś1 D5 भर्तारं च ससागरां पृथिवीं नाधिगच्छति

9 D3 om 9cd —a) Ś1 सुस्थिरश्च, Ñ V1 B D1 3 M1 सुलितश्च, Dt1 सुशुभश्च, D3 खलु महा, Cm g as in text (for सुभगश्च) Ś1 Ñ V1 B D1 3 5 M1 [S]सौ (for [S]सौ) —b) Ś1 Ñ V1 B D1 3 5 गिरिराजो(Ñ1 °ज) महाद्युति (V1 D3 °गिरि) Dt1 T Ct गिरिराजसमो गिरि —D3 om 9cd —c) D3 वने (for यस्मिन्) —d) Ś1 B3 D5 सौंदिरे, Ñ2 B2 4 M3 मन्दिरे, Cr m g as in text (for नन्दने)

G 2. 0. 0
B. 2. 98. 13
L. 2. 112. 11

कृतकार्यमिदं दुर्गं वनं व्यालनिषेवितम् ।
यदध्यास्ते महातेजा रामः शस्त्रभृतां वरः ॥ १०

एवमुक्त्वा महातेजा भरतः पुरुषर्षभः ।
पद्भ्यामेव महातेजाः प्रविवेश महद्वनम् ॥ ११

स तानि द्रुमजालानि जातानि गिरिसानुषु ।
पुष्पिताग्राणि मध्येन जगाम वदतां वरः ॥ १२

स गिरेश्चित्रकूटस्य सालमासाद्य पुष्पितम् ।
रामाश्रमगतस्याग्नेर्ददर्श ध्वजमुच्छ्रितम् ॥ १३

तं दृष्ट्वा भरतः श्रीमान्मुमोद सहबान्धवः ।
अत्र राम इति ज्ञात्वा गतः पारमिवाम्भसः ॥ १४

स चित्रकूटे तु गिरौ निशाम्य
रामाश्रमं पुण्यजनोपपन्नम् ।
गुहेन सार्धं त्वरितो जगाम
पुनर्निवेश्यैव चमूं महात्मा ॥ १५

इति श्रीरामायणे अयोध्याकाण्डे द्विनवतितमः सर्गः ॥ ९२ ॥

---

10 [a]) Ñ1 दुर्गं-; Ñ2 स्वर्गं (for दुर्गं). —[b]) D3 M3 वन-; M4 सुग- (for वनं). —[c]) T3 यम् (for यद्). Ś1 Ñ2 V1 B D1-3.4 M1 अध्यास्ते यत् (by transp.), Ñ1 अध्याध्यास्ते (sic), T3 यम° (for यदध्यास्ते). Ñ2 B1 महाबाहु; Dt1 °राशो; D1-3 °भागो; Cg as in text (for °तेजा). —[d]) B1 धर्मभृतां (for शस्त्र°).

11 [a]) M4 उक्तो (for उक्त्वा). Ś1 Ñ1 V1 B2.3.4 Dg1 Dd1 Dm1 D1-3.5 T2.3 G M1.3 महाबाहुर्; Cg as in text (for °तेजा). —[c]) Ñ2 B3 M3 महाबाहुः (for °तेजाः). —[d]) V1 D1-3 चचार सु-; B4 विविवेश (for प्रवि°). Ñ1 B3 T3 महावनं (for महद्वनम्).

12 [a]) Ñ2 B1.4 शतानि (for स तानि). Ñ1 reads from द्रु up to नि in [b] in marg. B3 -जातानि (for -जातानि). —[c]) Ñ1 सुताले,(sic), B3 (sup. lin. also as in text) सुरपाला (sic), D3 मध्ये च (for मध्येन). —[d]) D3 नगमे (sic) (for जगाम). M3 वदतां; Cg as in text (for वदतां).

13 [a]) Ñ2 V1 B D1-3 M1 सानुम्; Dg1 शालम्; Ck as in text (for सालम्). Dg1 Dt1 आरुह्य; Ck as in text (for आसाद्य). Dt1 सर्वतः (for पुष्पितम्). Ś1 D4 सानून्यन्येषु (D5 °न्येष्य; L(ed.) °श्चिष्य) वेष्टितः. —D2 om. 13[cd]. —[c]) Ś1 रामाश्रमे (for °श्रम). Ś1 Ñ V1 B1.3 (marg. also -दुरस्य).4 D1-3 -कृतस्य (for -गतस्य). V1 [अ]ग्नि D1 Ck.p.tp [र्] ति (for [अ]ग्नेर्). —[d]) Ś1 Ñ B D1.3 M1 दृष्टवान् (D1 M1 ददर्श) धूममुच्छ्रितं, V1 D2 ददर्श (D1 °दर्श) धूममग्र°. ꣸ Ck.: एवं रामाश्रमगतस्याग्नेरिति पाठे पाठे योजना शक्या (!) रामाश्रमगतस्याग्नेरिति पठित्वा यथेष्टं योजयत्यन्यः ॥ Ct : रामाश्रमगतस्येति इति पाठे तदाश्रमगतस्य सालस्योपरि यदुच्छ्रितं ध्वजं कोविदारध्वजं दृष्टेत्यर्थः । धूमदर्शनस्य पूर्वमेव जातत्वेन तस्यानिर्णायकत्वादिति कतकः । ꣸

14 D2 mostly damaged for [a]. —[b]) D3 मुदितः; M3 मुमुदे; K(ed.) Cg मुमोद; Cgp as in text (for मुमोद). Dd1 Dm1 T1 G M1.3 -बान्धवैः (for -बान्धवः). —[c]) Ś1 D5 यत्र (for अत्र). —[d]) Ś1 B3 गत्वा, D2.3 गतः (for गतः). B3 इव (for इव). G1 [अ]म्भोभिः Ck [अ]म्भसः (for [अ]म्भसः).

15 V1 D1-3 om. 15. —[a]) Ś1 चित्रकूटेषु Ñ B D4 °कूटेषु (for °कूटे तु). Ś1 Ñ B1.3.4 Dg1 Dt1 Dd1 Dm1 D6 G3 M1.3 Cm g निशम्य; B2 निपद्यन्; Cr as in text (for निशाम्य). —[b]) Ś1 Ñ B D6 पुण्यजनो (Ñ1 °ना; Ñ2 °लो) प (B1 °नेन) सेवितं. —[d]) Ś1 D6 व्यवस्थाप्य (for निवेश्यैव). G1 चमूम् (for चमूं)

